दशावतरवर्णनं

{॥ दशावतरवर्णनं ॥}

मार्कण्डेय उवाच

अवतारानहं वक्ष्ये देवदेवस्य चक्रिणः ।

ताञ्शृणुष्व महीपाल पवित्रान् पापनाशनान् ॥ १॥

यथा मत्स्येन रूपेण दत्ता वेदाः स्वयम्भुवे ।

मधुकैटभौ च निधनं प्रापितौ च महात्मना ॥ २॥

यथा कौर्मेण रूपेण विष्णुना मन्दरो धृतः ।

तथा पृथ्वी धृता राजन् वाराहेण महात्मना ॥ ३॥

तेनैव निधनं प्राप्तो यथा राजन् महाबलः ।

हिरण्याक्षो महावीर्यो दितिपुत्रो महातनुः ॥ ४॥

यथा हिरण्यकशिपुस्त्रिदशानामरिः पुरा ।

नरसिंहेन देवेन प्रापितो निधनं नृप ॥ ५॥

यथा बद्धो बलिः पूर्वं वामनेन महात्मना ।

इन्द्रस्त्रिभुवनाध्यक्षः कृतस्तेन नृपात्मज ॥ ६॥

Stotram Digitalized By Sanskritdocuments.org

रामेण भूत्वा च यथा विष्णुना रावणो हतः ।

सगणाश्चदभुता राजन् राक्षसा देवकण्टकाः ॥ ७॥

यथा परशुरामेण क्षत्रमुत्सादितं पुरा ।

बलभद्रेण रामेण यथा दैत्यः पुरा हतः ॥ ८॥

यथा कृष्णेन कंसाद्या हता दैत्याः सुरद्विषः ।

कलौ प्राप्ते यथा बुद्धो भवेन्नारायणः प्रभुः ॥ ९॥

कल्किरूपं समास्थाय यथा म्लेच्छा निपातिताः ।

समाप्ते तु कलौ भूयस्तथा ते कथयाम्यहम् ॥ १०॥

हरेरनन्तस्य पराक्रमं यः शृणोति भूपाल समाहितात्मा ।

मयोच्यमानं स विमुच्य पापं प्रयाति विष्णोः पदमत्युदारम् ॥ ११॥

इति ।

नरसिंहपुराण अध्याय ३६ श्लोकसंख्या ११

श्रीनरसिंहपुराणे हरेः प्रादुर्भावानुक्रमणे षटत्रिंशोऽध्यायः ॥ ३६॥

From Narasimhapurana adhyAya 36

https://archive.org/details/NarsimhaPuranGitapress

Proofread by Singanallur Ganesan singanallur at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ृoday

http://sanskritdocuments.org

Dashavatara Varnanam Lyrics in Devanagari PDF
% File name : dashAvataravarNanamNP.itx
% Location : doc_vishhnu
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Proofread by : Singanallur Ganesan singanallur at gmail.com
% Translated by : https://archive.org/details/NarsimhaPuranGitapress
% Description-comments : Narasimhapurana adhyAya 36 1-11
% Latest update : June 9, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website